योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०३३

श्रीराम उवाच ।

भगवन्युद्धमेतन्मे समासेन मनाग्वद ।

श्रुतिराह्लाद्यते श्रोतुर्यस्मादेताभिरुक्तिभिः ।। १

श्रीवसिष्ठ उवाच ।

अथ तत्रैव ते देव्यौ संग्रामं तमवेक्षितुम् ।

विमाने कल्पिते कान्ते रुद्धे रुरुहतुः स्थिरे ।। २

एतस्मिन्नन्तरे तत्र लीलेशः प्रतिपक्षतः ।

तमुत्सोढुमशक्तः सन्मुखव्यतिकरे रणे ।। ३

प्रलयार्णवकल्लोल इवोत्पत्त्योद्भये भटे ।

जहौ सानाविव शिलां भटस्योरसि मुद्गरम् ।। ४

अथ प्रवृत्तः प्रसभं प्रलयार्णवरंहसा ।

सेनयोः शस्त्रसंपातः किरन्ननलविद्युतः ।। ५

तरत्तरलधाराग्ररेखाङ्कितनभस्तलः ।

ध्वनत्कणकणाशब्दमध्यलक्षितटांकृतिः ।। ६

धीरहुंकारमिश्रोष्मघर्घरारवघस्मरः ।

प्रवृत्तशरधाराग्रभास्करार्चिर्वितानकः ।। ७

नदत्कङ्कटटङ्कारप्रोड्डीनकणपावकः ।

परस्पराहतिच्छिन्नहेतिखण्डखगाम्बरः ।। ८

वीरदोर्द्रुमसंचारवहद्वननभस्थलः ।

कोदण्डचक्रक्रेङ्कारद्रवद्वैमानिकाङ्गनः ।। ९

महाहलहलारावभृङ्गीकृतघनध्वनिः ।

निर्विकल्पसमाधिस्थ इवैकघनतावशात् ।। १०

नाराचासारधाराग्रलूनशूरशिरस्करः ।

परस्परांससंघट्टरणत्कङ्कटसंकटः ।। ११

हुंकारहतहेत्युग्रसंघट्टकटुटांकृतः ।

तरद्धारातरङ्गाभ्रदन्तुराशेषदिङ्मुखः ।। १२

हेतिसंघट्टविक्षोभमुष्टिग्राह्यझणज्झणः ।

चिरमास्फोटकास्फोटलुठच्चटचटारवः ।। १३

प्रवहत्खड्गसीत्कारज्वलत्कणसणध्वनिः ।

सरच्छरभराध्वान्तशरत्खरखरारवः ।। १४

धगद्धगितिविच्छिन्नकण्ठोत्थप्राणलोहितः ।

छिन्नबाहुशिरःखड्गखण्डनिर्विवराम्बरः ।। १५

कङ्कटोत्थस्फुरद्वह्निसटास्पृष्टशिरोरुहः ।

रणत्पतदसिव्रातमत्तपीनझणज्झणः ।। १६

कुन्तकुण्ठितमातङ्गतरङ्गोत्तुङ्गलोहितः ।

दन्तिदन्तविनिष्पेषतारचीत्कारकर्कशः ।। १७

महामुसलसंपातपिष्टकष्टोद्धुरस्वरः ।

तरच्छूरशिरःपद्मप्रकराच्छादिताम्बरः ।। १८

व्योमन्यस्तभुजाहीन्द्रः पूर्णधूलिमयाम्बुदः ।

छिन्नहेतिनरारब्धकेशाकेशिप्रतिक्रियः ।। १९

नखानखिनिकृत्ताक्षिकर्णनासोष्ठकन्धरः ।

छिन्नायुधमहामल्लहेलोल्लालनलब्धभूः ।। २०

पतत्समदमातङ्गकम्पितोर्वीलुठद्रयः ।

रणद्रथरयोत्पन्नक्षरद्रक्तसरित्पथः ।। २१

रजोरचितनीहारः कचत्प्रवहदायुधः ।

एकीकृतघनक्षोभसैन्यसागरगर्जितः ।। २२

मत्तहासविलासेन मृत्युना परिचर्वितः ।
गर्विताद्रीन्द्रनागेन्द्रखर्विताम्भोदगर्जितः ।। २३
वृक्षश्वभ्रतटीच्छन्नचक्रशक्त्यृष्टिमुद्गरः ।
शरोर्णातन्तुनीरन्ध्रघृष्टियोधाद्रिमेखलः ।। २४
मेघविश्रान्तविच्छिन्नपताकापटचामरः ।
यन्त्रपाषाणचक्रौघदूरविद्रुतखेचरः ।। २५
मरणव्यग्रकृत्ताङ्गयोधाक्रन्दातिघर्घरः ।
कुठाराघातसंघातविदलन्मस्तकव्रजः ।। २६
दूरोड्डीनकचत्खड्गखण्डतारकिताम्बरः ।
शक्तिनिर्मुक्तशक्त्यौघविभिन्नेभावृतावनिः ।। २७
सैन्यव्याकुलवेताललललनोन्मुक्तमुद्गरः ।
गगनोत्तम्भितोत्तुङ्गशूरतोमरतोरणः ।। २८
भुशुण्डीभग्नखड्गौघखण्डालीव्योमकुन्तलः ।
कुन्तवेणुवनन्यस्ततापाम्बरकचच्छविः ।। २९
खड्गर्ष्टिवृष्टिसंपुष्टराजपूजितसैनिकः ।
शूलोत्तम्भितसच्छूरग्रहणोद्यमिताप्सराः ।। ३०
गदातुषारविगलत्स्फुरिताङ्गदिङ्मुखः ।
प्रासप्रसभसंपिष्टकष्टचेष्टतयोत्कटः ।। ३१
चक्रक्रकचसंचारच्छिन्नाश्वनरवारणः ।
परशुव्रातसंपातपतत्समदवारणः ।। ३२
लकुटोल्लोडनोड्डीनप्रोड्डामरचटद्भटः ।
यन्त्रपाषाणसंपातपिष्टकेतुरथद्रुमः ।। ३३
करवालविलूनाग्रच्छत्रपङ्कजपाण्डुरः ।
क्षेपणक्षोभसंक्षीणसैन्यक्षोभोऽप्यलक्षणः ।। ३४
कबन्धबन्धसंनेतृपातसंपिष्टपार्श्वगः ।
साङ्कुशाङ्कितसंख्यस्थवीरवारितवारणः ।। ३५

परशुव्रातसंपातपतत्समदवारणः ।

पाशाप्राशिविशेषज्ञवीरातिपरिदेवनः ।। ३६

क्षुरिकाकुक्षिनिर्भेदगलत्पद्मपतज्जनः ।

त्रिशूलवलनोन्मत्तशूवरसंकरनर्ततः ।। ३७

धावद्धानुष्कसंपूर्णकुलकूजितकाकलिः ।

भिन्दिपालसटाटोपहुंकारारभटीनटः ।। ३८

वज्रमुष्टिविनिष्पिष्टपिष्टसद्भटसंकटः ।

श्येनवद्व्योमपदवीप्रोत्पतत्पटुपट्टिशः ।। ३९

अङ्कुशाकृष्टशूरेशरथेभहयकेतनः ।

हलाहलिहतालूनहेलाकुलकुलाचलः ।। ४०

सुतालोत्तालकुद्दालनिखातवनभूतलः ।

धनुर्द्विगुणमात्रास्तलूनलोकशिलावलिः ।। ४१

क्रकचोभयपार्श्वभिच्छिन्नमत्तमतङ्गजः ।

संग्रामोलूखलक्षुण्णलोकतण्डुलमौसली ।। ४२

अस्त्राभाशृङ्खलाजालबद्धसेनाविहङ्गमः ।

लोलासिवीरनिस्त्रिंशनीतवादिगृहाङ्गणाः ।। ४३

गणशो नीयमानाग्र्यश्वापदारावनिर्भरः ।

नखाङ्गुष्ठखनत्पुङ्खप्रेङ्खारणरणारवैः ।। ४४

मरिचैर्व्यञ्जनानीव रञ्जयन्सकलारवान् ।

सैन्यनिक्षिप्तकुम्भाग्निदग्धयोधेरितायुधः ।

सैन्यनिक्षिप्तकुम्भाग्निदग्धयोधोज्झितायुधः ।। ४५

सैन्यनिक्षिप्तकुम्भस्थतप्ताङ्गारहतेक्षणः ।

सैन्यनिक्षिप्तकुम्भस्थविषवारिदलज्जनः ।। ४६

नाराचवर्षवरवारिदवीरपूर-

मत्ताभ्रसंभ्रमसनृत्तकबन्धबर्ही ।

कल्पान्तकाल इव वेगविवर्तमान-

मातङ्गशैलवलितो रणसंभ्रमोऽभूत् ।। ४७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे सेनयोः प्रथमपातवर्णनं नाम त्रयस्त्रिंशः सर्गः ।। ३३ ।।